## ईदूदेद्द्विवचनं प्रगृह्यम् । (११/१००)

ईत् ऊत् एत् इत्येवमन्तं [1]द्विवचनं शब्दरूपं प्रगृह्यसञ्ज्ञं भवति । अग्नी इति । [2]वायू इति । [3]माले इति । पचेते इति[4] । ईदूदेत् इति किम् ? वृक्षावत्र । प्लक्षावत्र । द्विवचनम् इति किम्? कुमार्यत्र । किशोर्यत्र । तपरकरणमसंदेहार्थम् । प्रगृह्यप्रदेशाः–'प्लुतप्रगृह्या अचि नित्यम्' (६.१.१२५/९०) इत्येवमादयः । ईदादीनां प्रगृह्यत्वे[5] मणीवादीनां प्रतिषेधो वक्तव्यः । 'मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम'[6] (महाभारते १२.१७२.१२) । दम्पतीव (ऋ. २.३९.२) । जम्पतीव[7] । रोदसीव ॥

## अदसो मात् । (१२/१०१)

अदसः[8] सम्बधी यो मकारस्तस्मात् परे[9] ईदूदेतः प्रगृह्यसञ्ज्ञा भवन्ति (म.भा. १.६८) । अमी अत्र । अमी आसते । अमू अत्र । अमू आसाते । एकारस्य उदाहरणं नास्ति । अदसः इति किम्? शम्यत्र[10] । [11]दाडिम्यत्र । मात् इति किम् ? अमुकेऽत्र ॥

## शे । (१३/१०२)

शे इत्येतत्[12] प्रगृह्यसञ्ज्ञं भवति । किमिदं शे इति ? सुपामादेशश्छन्दसि । 'न युष्मे वाजबन्धवः' (ऋ. ८.६८.१९) । 'अस्मे इन्द्राबृहस्पती' (ऋ. ४.४९.४) । युष्मे इति (ऋ. पदपाठ) । अस्मे इति (ऋ. पदपाठ) । 'त्वे रायः' (तै.सं. ३.२.५.२) । 'मे रायः' (वा.सं. ४.२२) । त्वे इति (तै.सं.पदपाठ) । मे इति (वा.सं. पदपाठ) । छान्दसमेतदेवैकमुदाहरणम्—'अस्मे इन्द्राबृहस्पती' (ऋ. ४.४९.४) इति । तत्र तथा पाठात् । इतरत् तु लौकिक-[13]मनुकरणम्—युष्मे इति, अस्मे इति, त्वे इति,[14] मे इति ॥

## निपात एकाजनाङ् । (१४/१०३)

एकश्चासावच्च एकाच्, निपातो य एकाच् आङ्वर्जितः स प्रगृह्यसञ्ज्ञो भवति । अ अपेहि । इ इन्द्रं पश्य । उ उत्तिष्ठ । आ एवं नु मन्यसे (म.भा. १.७१) । आ एवं किल तत्[15] (म.भा. १.७१) । [16]निपातः इति किम् ? चकारात्र । जहारात्र । एकाच् इति किम्? 'प्राग्नये वाचमीरय' (ऋ. १०.१८७.१) । अनाङ् इति किम् ? आ उदकान्तात्, ओदकान्तात्[17] ।

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित् ॥ (म.भा. १.७१)

---

1. द्विवचनान्तं फ. ह. शब्दरूपं नास्ति अ.क.ह. 2. बटू अ. 3. खट्वे इति इत्यधिकं क.फ.न्या. 4. यजेते इत्यधिकं न्या. 5. प्राप्ते मणीवादीनामुपसंख्यानम् क.ड. 6. आह्रियमाणौ तौ दृष्ट्वा मङ्किस्तत्रेदमब्रवीत् अ. 7. जम्पतीव नास्ति फ. ह. 8. अदस्शब्दसम्बन्धी फ. ग. 9. परे ये ते क. ड, परो ई. 10. शम्यत्रेति मात् किम् ह. 11. डाडिम्यत्र फ, वाम्यत्र क. 12. शब्दरूपं इत्यधिकं फ. ह, इति च क. 13. उदाहरणम् ग. 14. त्वे इति नास्ति फ. 15. तत् नास्ति फ. 16. वाक्यमिदं नास्ति फ. 17. ओदकान्तात् प्रियं प्रोथमनुव्रजेत् अ. ड.